Chap-8

# अष्टमः परिच्छेदः

# क-रससिद्धान्तस्यविरुद्धाक्षेपः समाधानञ्च

मनोवैज्ञानिकोऽर्थो मूलतो व्यक्तिसन्दर्भे व्यापकत्वेन च सामाजिकसन्दर्भेऽपि घटते। एतदनुसारेण मूल्याधारोऽन्तर्वृत्तीनां परितोषः कलानिकषश्चास्ति तासामन्तर्वृत्तीनां समञ्जने क्षमता। रिचर्डसोऽस्य सिद्धान्तस्योद्भावकः। अनुक्तमपीदमूह्यम्—यद्रससिद्धान्तस्यामीभिः कल्याणवादिमूल्यैः सह पूर्णं सामञ्जस्यमिति। तत्रापि योऽयमानन्दः कल्पित, स व्यक्तिगतं समष्टिगतञ्च कल्याणमाधृतः। रसाभासप्रसंगेवयमिदं विशदकार्ष्म यद्रसकल्पना लोकशास्त्रमर्यादासु कात्स्न्येनाबद्धास्ति। प्रकृतेराचारस्य च नियमा एवानन्दस्वरूप निर्मन्ति। ताभ्यां परतो रसास्तित्वं न मन्यते। इत्थं रसकल्पना नैतिककल्पनास्ति, लोकशास्त्रयोरोचित्यमेव रसस्योपनिषद्। रामादिवद्वर्तितव्यं न रावणादिवदिति धर्मविवेकः काव्यस्य स्वीकृतं फलमस्ति। यन्न विधिनिषेधाभ्यामपि तु प्रीत्या प्राप्यते। अन्ततश्चतया काव्यरसस्य पुष्टिः सिद्धिश्च भवति। जीवनपरमार्थसिद्धिः भारतदेशे यथा विभिन्नानां सम्प्रदायानां प्रादुर्भावो जातः तथैव एकोनविंश्यां शताब्यामेतद्विचारधारान्तर्गततया यूरोपदेशे कश्चिदालोचकानामितरो वर्गः समुत्थितः। यो मन्यते स्म 'कला स्वयं स्वप्रयोजनम्' इति। सामान्यानि लौकिकानि प्रयोजनान्यनेन तावत्प्रतिष्ड्रिान्येव, आनन्दोऽपि तत्प्रयोजनतया नोररीकृतः। कलासौन्दर्यं तन्मते पर्यायवास्ताम्, अतस्तेषां साहित्यचेतनाया आधारः, सौन्दर्यम्—तत्सौन्दर्यम् यत्सर्वविधनैतिकपरिभाषामुक्तं स्वतः पूर्णं स्वायत्तञ्च भवति। काव्यस्यैकमात्रं प्रयोजनं तदेव। परं यथान्यत्रासाध्यम्, सौन्दर्यस्यान्तर्भावोवस्तुत आनन्दः एव भवति, सौन्दर्य हि प्रयोजनं न सम्भवति। कल्याणवादिनां मूल्यानामाधारः पुनरयमतर्क्यो यत्काव्यस्य प्रयोजनं मानवकल्याणमेवास्ति अत्रापि मानवकल्याणपरिभाषाभेदेन कल्याणवादिमूल्यानामनेके भेदाः प्राप्यन्ते। कल्याणपदं नैतिके धर्मपरके चार्थे साक्षाद् रूढम्—'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।' स धर्मो येन मानवस्य पार्थिवं पारमार्थिकं च कल्याणं स्यात्। कलाकोविदानामेको वर्गः कलामूल्यनिकषत्वेनेदमेव मन्यते। प्लेटोहोरेसमिल्टनास्किनादीनामिदमेव मतम्, यत्समष्टिवादिनैतिकमूल्यान्याधृतम्। अत्र परोऽर्थः पूर्वस्माद् व्यापकतरः। अयं मानवस्य सुखदुःखयोर्बलाबलयोरवाश्रितानि मानवीयमूल्यान्यनुसरत्कल्याणस्वरूपं निर्धारयति। अस्य वर्गस्य प्रतिनिधिरस्ति टालस्टायः। कल्याणस्य तृतीयोऽर्थः—भौतिकोत्कर्षोऽस्ति, यः समाजिकमूल्यन्याधृतः। इयं कल्याणस्या मार्क्सवादिनी परिभाषा। एतदतिरिक्तौ कल्याणपदार्थावन्यावपि

भवतः एकः सांस्कृतिकः, परश्चव मनोवैज्ञानिकः। सांस्कृतिकस्यार्थस्याधारोऽपि नैतिकं मूल्यमेव। परंतद्व व्यावहारिकीमुपयोगितां यावदेव न सीमितम्, अपितु चेतना परिष्कारे व्यक्तित्वोत्कर्षे च बलमाधत्ते। वृत्तीनां संयमाद्दमनाद्वा सांस्कृतिकमल्यानां लक्ष्यमुन्नयने संस्कारे च केन्द्रितमं भवति। विधिनिषेधापेक्षया सहजयोरभिव्यक्तिविकासयोस्तान्यधिकं विश्चवसिति। आंगलालोचकेषु मैथ्यू आर्नल्डः, हिन्द्याञ्चाचार्यः रामचन्द्रशुक्लः काव्यस्य सांस्कृतिकमूल्यानां प्रतिष्ठापकौ स्तः। काव्ये रसमाध्यमेनैव मन्यते, एतदन्तर्गततया व्यक्तिसमाजयोः कल्याणभावना निहितास्ति। एवमेव मानवसंवेदनाया अन्तर्वृत्तीनाञ्च सामञ्जस्यमाधृताः कल्याणधारणा अपि रसकल्पनायां सहजमन्तर्मुज्यन्ते। रागात्मिका वृत्तिर्हि रसस्य मूलाधारः। समष्टिभावना साधारणीकृतिर्वा तत्परिपाकसाधनम्, चित्तसमाहितिश्च तत्परिणतिः। अतएव रससिद्धान्ते आनन्दवादिकल्याणवादिमूल्यद्वन्द्वं निराक्रियते। स्वकीये सहजे रूपेऽयं सर्वविधसङ्कीर्णतामुक्तोऽस्ति, एकत्रायमानन्दस्य हीनतराभ्योऽवस्थभ्यो मनोरञ्जनामोदप्रमोदेन्द्रियसुखादिभ्यः उद्गतोऽस्ति, अपरतः कलयाणस्य क्षुद्रतराभ्यः उपयोगितावादिनीभ्यो नैतिकीभ्यश्च विधिनिषेधमूलकसीमाभ्योऽपि दवीयानस्ति। अयं सिद्धान्तो वस्तुतः सांस्कृतिकभूमिकायां ततोऽपि वा गंभीरायां शुद्धमानवीयभूमिकायां प्रतितिष्ठति यः किलानन्दकल्याणयोः संगमतीर्थमस्ति, यत्र नैतिकसांस्कृतिकानि, वैयक्तिकसामाजिकानि मूल्यानि निर्विरोधं मिलन्ति, संगतानि च भवन्ति।

रससिद्धये किमपि परिपूर्ण रसविधानमपेक्ष्यते यत्काव्यस्य प्रबन्धात्मकरूपा दन्यत्र प्रायो दुष्करमेव भवति। भारतीयमुक्तकानामपि कल्पना प्रबन्धस्यैव लघुत्तमे रूपे कृतास्ति, अतस्त्रापि तद्विधानं संगच्छते। परमीदृशान्यपिच्छन्दासि सुभाषितानि च प्राप्यन्ते यत्र कश्चिदतिसूक्ष्मो भावगन्धोऽतितरलमनुभूतिचित्रमेव तत्काव्यसारसर्वस्वतां याति, तत्र रससिद्धिः कथं मान्या स्यात्।

रसानां विरोधाविरोधयोः स्थिरधारणानां कारणाद्रसक्षेत्रमधिकतरं परिसीमितम्। मानवचेतना तदीया अभिव्यक्तयश्चान्तर्विरोधपुञ्जीभूताः सन्ति। जीवनचित्रं यावत्प्रबलं परिपूर्णञ्च स्यात् तस्मिन्नन्तर्विरोधा अपि तावन्त एव स्युः कविकाव्ययोश्चवाप्यीदमेव सत्यम्। भारतीयवाङ्मये महाभारतं पाश्चवात्यवाङ्मये च शेक्सपियर—नाटकचक्रं स्वसमग्रतायां जीवनस्यानन्तानन्तर्विरोधान्सञ्चित्य स्थितम्। वस्तुतस्तत्र तु काव्यगौरवमेवामीभिः प्रबलैरन्तर्विरोधैरुन्मीलिति। रससिद्धान्तनिकषेत्विदं महत्वं दोषीभूय तिष्ठेत्।

रससिद्धा तस्येयमेका महती सीमा यत्स रसं सहृदयनिष्ठमेव मत्वा प्रवर्तते यने कविगतः काव्यगतश्च रसः सर्वथोपेक्षितो भवति। परिणामतो यत्र कुतश्चन् पूर्वग्रहादितः कारणात् सहृदयस्य ग्रहणशक्तिर्बाध्यते तत्र सरसस्यापि काव्यस्य मूल्यांकनं न भवति। इतः परमिदमपि सदावश्यकं न भवति यन्नाट्यकाव्यगतस्य स्थायिभावस्य सहृदयगतेन स्थायिभावेन सह सर्वत्र तादात्म्यमेव स्यात्। बहुधा

द्वयोर्नसंगति रेवेति, अपितु विरोधोऽप्युत्पद्यते। यथा क्वचिद् नायिकानायकौ कस्मिंश्चिद्गहने कानने नरमांसभक्षणदृश्यं पश्यतः। अत्र परिस्थितौ वीरश्चेत् नायकस्य हृदिक्रोधः, नायिकायाश्च भयम्, प्रेक्षकस्य पाठकस्यवा जुगुप्सोदेति। इत्थं काव्योपवर्णितेन स्थायिभावेन सह सहृदयगतस्य स्थायिभावस्य तादात्म्याभावाद्रसपरिपाकः कथं स्यात्? रससिद्धान्तस्येयमेकात्यन्तावदाता विसंगतिरस्ति।रसो हि नाम काव्यास्वाद इति-चेत्तदा तस्य प्रायो निर्मितिरेव भवति। रसः काव्यास्वादो वा कस्यचिदेकस्य शुद्धस्यामिश्रस्य वा भावस्यानानुभूति, अपितु सोऽनुमतीनामेकीकरणमेव। यस्य निर्माणमेव भवन्ति, नोद्बोधः। अतो रससिद्धान्तः, यदनुसारेण वासनात्मतया स्थितः कश्चिदेकः स्थायाभावोऽभिव्यक्तो रसरूपतामेति, काव्यास्वादस्य वास्तविकं स्वरूपं न निरूपयति। वर्तमाने जीवने तु स्थायित्वस्य भावनाया एव पूर्णतया विघटनं जातम्। अद्य तु परिवर्तनमेव सत्यम्, यत्र केवलं क्षणास्तित्वं स्वीकार्यमस्ति। अतोऽद्यतनी कविता केवलस्यानुभूयमानस्य क्षणस्यैवाभिव्यक्तये क्षमते, इतः प्रतीपं रससिद्धये स्थायिभावस्य संस्कारोऽप्यनिवार्यतामेति। भावस्य सद्योऽनुभूतिः, अनुभूयमानरूपनिरूपणास्वादो वा रसो न सम्भवति। अतः समसामयिक्याः कविताया मूल्यांकने रससिद्धान्तो नापयुज्यते। बलाबलयोरनेन प्रत्यक्षेणाप्रत्यक्षेण वा विपर्ययेण काव्यजीवनयोरुभयोरपि क्षतिः सम्भवति भवति च।रससिद्धान्तविरोधे वा एतादृशा वाऽऽक्षेपाः प्रायः क्रियन्तेऽक्रियन्ते च। एतेषु भूयसां समाधानं वयं विभिन्नेषु प्रसंगविवेचनेष्वकार्ष्म। तथापि सत्यासत्ययोः सम्यङ् निर्णयायान्ते पुनरप्येकदा एषु विचारः समुपादेः स्यात्। रसस्य ब्रह्मानन्दसहोदरतामधिकृत्य क्रियते—सरलो बहुचर्चितश्च, यो रसमान्यताविरोधे केनापि कदाचिदपि सुप्रयोज्यः। अयञ्चास्माभिरत्रैव परिच्छेदे समाहितः। ब्रह्मानन्दसहोदर इति रसविशेषणेन केवलमेतत्प्रकाश्यते यद्रसानुभूतिः सामान्यैन्द्रियानुभूतिर्नास्ति, सा भावानां साधारणसुखदुःखात्मकानुभवाद्भिद्यते, रागद्वेषमुक्ततया तत्स्वरूपं सामान्यविषयानुभूतेरत्यन्तमुदात्तमवदातञ्च भवति। अद्वैतवादिभिराचार्यैनं केवलस्य रसस्य अपित्वानन्दमात्रस्य कल्पनैवात्मानन्दसन्दर्भे क्रियते, आनन्दो ह्यद्वैतदर्शने केवलस्यात्मन एव स्वरूपतया निरूप्यते, मनसो ज्ञानेन्द्रियाणां वा नासौ विषयः। स्वकीयेनातिपरिष्कृतेन सूक्ष्मतमेन च स्वरूपेण काव्याऽऽनन्दो विषयानन्दादूविष्ठ आत्मानन्दस्य च नेदिष्ठो भवतीति ब्रह्मानन्दसहोदर पदार्थ एतावानेव। यद्यात्मानि—भवन्तोऽनास्थिततास्तदा चेतनाशब्दं प्रयोक्तुर्महन्त रसश्चेतना—समाहितिरिति च मन्तुं शक्नुवन्ति। अयमाशयः—ब्रह्मानन्दसहोदर इति रसविशेषणं विशिष्टायाश्चिन्तनप्रणाल्याः—पारिभाषिकं पदम्। तत्केवलमैतिह्यसन्दर्भे ग्राह्यम्, अद्यतनः प्रमाता च यदि ब्रह्मणो वात्मनो वा धारणां नांगीकरोति तदास्य शब्दस्याधुनिकालोचनाशास्त्रीयशब्दातत्यामाख्यानं कर्तव्यम्। अहं स्वयमपि रसमात्मानन्दसन्दर्भे न गृहणामि, तत्र चात्मानस्तित्वेऽहं सर्वथाऽऽश्वस्तोऽस्मीति न

हेतुः प्रत्युतात्मानन्दधारणाया अस्तव्यस्तता विवादग्रस्तते वा चात्रप्रयोजकम्। रसस्यास्तित्वे च मम वा प्रत्येकं सहृदयस्य वा सर्वथा सन्देहशून्यानुभूतिरेव हेतुः प्रमाणम्। अतोऽहं रसशास्त्रे प्रयुक्तां पारिभाषिकशब्दावली—सत्वोद्रेकात्मविश्रान्तिब्रह्मानन्द सहोदरादिरूपां—विवेकसम्मतेऽर्थे एव गृहणामि, जिघृक्षामि। जीवनस्य सूक्ष्मतत्वानां धारणा न देशकालपरिबद्धने वा व्यक्तिसीमिता अपितु विकासशीला एव भवन्ति। अनेनैव रूपेण ताः सार्वभौमाः शाश्वताश्च सम्भवन्ति। नैकस्य रससिद्धान्तस्य सम्पूर्णस्यापिकाव्यशास्त्रस्येदं दुर्भाग्यमभूत् यतः कोऽपीदमध्यगादवागाच्च स प्राचीन धारणानामत्यन्तरूढतामनन्यतयाश्च कदापि तदध्येतुमवेतुं च प्रायतत्, स यथाश्रुत मध्यवस्यानर्गलमालोचयति। अस्याक्षेपस्योत्तरं ध्वन्यलंकाराभ्यामन्तरंगसम्बन्धं स्थायित्वा रससिद्धान्तेत सहस्राब्धाः पूर्वमेव दत्तम्। काव्ये हि ध्वनिप्रतिष्ठा वस्तुतः कल्पनातत्वप्रतिष्ठायां परिणता, अलंकार—विधानमपि बिम्बविधानतया फलितम्। अनयोर्ध्वनिस्तावद्रसस्यानिवार्य माध्यममस्तत्येव, अलंकारोऽपि नोपेक्षणीयो भवति, अस्य चेदं प्रमाणं प्रत्नबलतेरणापि रसवादिनाऽऽचार्येण स्वकीये काव्यशास्त्रग्रन्थेऽलंकाराः सविस्तरं निरूपिताः। रसस्य काव्यजीवितत्वेऽपि तेन वाग्वैदग्ध्यप्रधानत्व स्वीकृत्य मुक्तकण्ठमुद्गीतम्। इत्थमिह रसविधाने बुद्धितत्वमपि न प्रहीनम्। उत्कृष्टकोटिकास्य सरसकाव्यस्य कृते भाववैभवेन सहार्थगौरवमप्यपरिहार्यतयापेक्षणीयमभूत्। अतो रससिद्धान्ते कल्पनाविचारौ नानंगीकृतौ, अयन्त्वत्र पणबन्धः, यत्तयोरूभयोरप्यनुभूतिर्विषयत्वेन स्यात्। अनुभूयमानौ हि कल्पनाविचारौ रसांगतां गच्छतः। अननुभूतौ तु काव्यविषयतामेव न धत्तः। रससिद्धान्ते यदि केवलयोस्तयोर्नास्ति प्रवेशस्तदारसस्य को दोषः? वस्तुतो व्यापके स्वार्थे रसः सौन्दर्यपर्याय एव, सौन्दर्यं हि तत्वतो रमणीयार्थबोधत्वम्, रमणीयश्च सोऽर्थः, यत्र सहृदयहृदय रमते। यस्तदह्लादचेतनागोचरः स्यात्। इत्थं रसमन्तरा सौन्दर्यकल्पना न सम्भवति, सुन्दरे सरसे च भेदो न शक्यते कुर्तुम। आदावेवेदं विशयकार्ष्म यत्सङ्ख्यानप्रश्नो रससिद्धान्ते गौणतमः। निःसंशयमनेकैराचार्यै रसभावादिसङ्ख्या निश्चित्यैव परिगृहीता। परमयं विषयोऽन्तं यावद्विवादास्पदतामेवावागाहत, संङ्ख्यापचयोपचययोश्च प्रयत्नाः प्रारीवृतदेव। अयमपि स्वरोऽविरतमुदगच्छत् यदिदं रसभावसंङ्ख्यानिर्धारणं नातीव संगतम्। न प्रतिभावमेव, अपि तु प्रतिसात्विकभावमपि रसनिष्पत्तिः सम्भवति। किञ्च रसाभासभाव-तदाभासोदय-शान्ति सन्धि शबलतादीनामपि रसेऽन्तर्भावेनेदं सर्वथा निश्चीयते यन्नास्ति रससिद्धान्तो रसभावनियतसङ्ख्याधीनः। सामान्यानां सिद्धान्तानां विषयणाञ्च निर्धारणं शास्त्रं प्रसक्तम्, तत्र वर्गीकरणादि पद्धतिः, नामरूपादिसंश्रितिश्चापेक्ष्यते। न खलु कदाचिदपि केनचिदाचार्येण भेदप्रस्तारो गणनाक्रमो वैकान्तात्यन्ततो निर्धार्यते। यत्र

क्वापि भेदकथनमुपक्राम्यते, संस्कृताचार्यैस्तत्र स्पष्टमुद्घुष्यते-भेदकथनमिदमुपलक्षणम्, यदीदृक्तामेव द्योतयति नेयत्तामिति। एवस्थिते नियतायाः सङ्ख्याया निर्धारिताया वा रेखायाः पुनरावर्तनं दुराग्रहस्य वाल्यबोधस्य वा ज्ञापकम्। अतो हेमलेटे गोदाने वा कतमो रसः इति प्रश्नो न महीयान् यद्यपि परम्परीण रसवादिनां हेमलेटे वेस्ट लैण्डे वा, गोदाने शेखरे वा कस्मिंश्चिदपि नियमतो रसो न दुर्निधारणः, तथापि नेयमेवस्माभिः समस्यासमाहितिरभ्युपेयते। शेखरे कतमो रस इति प्रश्न एव रूढ़िवादिनो दृष्टिकोणं परिचाययति, एतस्य चोत्तरमपि तेनैव दृष्टिकोणेन सुवचम्। परमिये उभे अपि प्रश्नोत्तरे न महत्वशालिनी। कः खल्वेषां ग्रन्थानामंगीरस इति प्रतिपादनमेव रससिद्धान्तस्य न गौरवास्पदम्। अपितु एतेषु प्रत्येकमास्वाद्यताया मूलं रसस्य वा रागात्मकस्य प्रभावस्य वानुभूतिसमृद्धिरेवास्तीति निरूपणमेव। न व्यभिचारिणः, अपि तु केवलस्यानुभावस्य चित्रणेनापि रससिद्धिर्भवति, अनुक्तस्तु रसावयवः स्वयमूह्यते। विभावादिविधिरपि रसशास्त्रे तावदिदमेवापेक्ष्या वधीयते यतस्तस्य स्फुटमस्फुटं वाऽऽधारं विना भावकल्पनाऽपि न सम्भवति, कुतस्तदनुभूतिः। भावस्य निराश्रया निरपेक्षा वा सत्ता न रसशास्त्रमात्रे, अपितु मनोविज्ञानेऽपि सर्वथाऽमान्या भवति। आधुनिकं मनोविज्ञानं पुनर्भावस्य स्वतन्त्रकल्पनायामपि संशयानं विद्यते। माहाराष्ट्र्या रसवादिभिरालोचकैरिममाक्षेपं निरसितुमेव भावादपि सूक्ष्मतरो भावगन्धोऽपि कल्पितः। अस्ति हि रससिद्धान्तेऽग्रेसरणावसरः।आक्षेपान्तरमप्येकं रसानां पारस्परिकौ विरोधाविरोधावधिकृत्य क्रियते। अस्य चायं मूलध्वनिः यदिह रससिद्धान्ते भावानां मिथः सम्बन्धः सर्वथा निश्चिततयम्मन्यते। परिणामतः स्वरुढौ रसप्रकिया तथा सरला समाहिता च जायते यदस्यामन्तःकरणस्यान्यासां शंकानामसमाहितीनां चावकाशः एव न भवति। इदमपि तावदल्पज्ञानविजृम्भितम्। यथा यथाप्रसंग स्पष्टीकृतम्। रससिद्धान्ते रसानां मिथो विरोधिनां रूपाणो विवेचनेन साकं, तेषां शमनस्यापि सातिविस्तरं निरूपणं क्रियते। शमनोपायाश्च ते तथाधिका विविधाश्च सन्ति यथा मानसिकजीवनस्य सर्वविधा अन्तर्विरोधास्तत्र समाधीयन्ते। एकमेव रसं तावदत्र विचारयामश्चेद् रसप्रक्रियायां सरलतारोपो न संगच्छते, यथा श्रृंगाररस एव मिथोभिन्नानां विरुद्धानाञ्च भावानां समेषामपि स्वैरसञ्चरणं शास्त्राणां सम्मातम् शेक्सपियरस्य यानि नाटकानि साक्षीकृत्यांगलविज्ञैरससिद्धान्तेऽयमाक्षेपः कृतः। तेषु नाटकेष्वपीदृशः प्रसंगः सम्भवतो न स्याद्यत्र भावानां विरोधः, रसशास्त्रीयान्, नियमाननुसृत्य–सुपरिहरो न स्यात्। यदि च क्वचित्ते नियमा नोपयुज्यन्ते, तदापि, न किञ्चिदन्तरमापतति। विरोधकल्पना हि न खलु रससिद्धान्तस्य मौलिकमंगम्, अपिचेयमस्थिरीभूय काव्येन साकं विकासमाशीलत, काले काले चास्यामपेक्षितानि संशोधनान्यप्यभूवन्। वस्तुतो रससङ्ख्यानस्येव रसविरोधस्य कल्पनापि रससिद्धान्तस्यानुषगिंगी सिद्धिः, यद्यपि तस्ये वास्यापि मनोवैज्ञानिक आधारः

स्वात्मनि पुष्टतरः। आक्षेपोऽयं बहुधा विचारयितुं शक्यते। यदि मूलतः काव्यास्वादो रसपदार्थस्तदा तत्स्थितिः सहृदयगतैवेति मान्यं स्यात्। आस्वादनात्मिका चेतनक्रिया हि व्यक्तावेव सम्भवति न वस्तुनि। कविकाव्यसहृदयत्रितये काव्यमचेतनमिति तत्तावदास्तां रसोद्गमे निमित्तं, न तु तदास्वादनक्षमम्। कविरपि रसस्रष्टेति व्यक्तम्, स किल रसाभिव्यञ्जकस्य काव्यस्य कर्तेति काव्यशास्त्रीया वाक्। अतः परिशेषाद्रसस्य कव्यास्वादस्य वा भोक्ता सहृदय एव भवति, नैत्प्रतिषेद्धुं शक्यते विशेषाद् व्यवहारे। परमार्थतोऽपि प्रमातारमन्तरा पदार्थे रसस्थितिप्रमितिरप्यसम्भवा न चेदसुकरा तु स्यादेव। भारतीयानां पाश्चात्यानाञ्च दर्शनानां समग्रा अप्यूहापोहा अद्यावधि नूनमद्वैतादधिकं प्रामाणिकं किमपि कल्पयितुं न प्राभवन्। नात्र विवादे वयं पाठकान् सम्भागिनो विधित्सामः। काव्यतत्वानि हि दार्शनिकीभ्यस्तर्क शास्त्रीयाभ्यो वोपकल्पनाभ्यो दूरतः काव्यपरिपेक्ष्य एव प्रेक्षितुमिच्छामः। परमत्र प्रश्नान्तरमुपतिष्ठते यत् काव्यस्यानेन रसेन कः सम्बन्धः। तस्य च स्फुटमुत्तरम्, काव्यमस्य प्रेरकं निमित्तकारणं वेति। स्वयमभिनवेन गुणालंकारमयशब्दार्थात्मकस्य काव्यस्य महत्वमुच्छ्वसितया वाचाभ्युक्तम्। गुणालंकारमयौ हि शब्दार्थाविव साधारणीकरणेन—आधुनिकशब्दावल्यां भावात्मकतयोपस्थापनेन—सहृदयस्थायिस्यभावं देशकालसीमतो व्यक्तिगतरागद्वेषतश्चैव विमोचयन् रसत्वेन परिणमयति। स्थायिभावस्य निष्प्रत्यूहां प्रतीतिमेवाभिनव रसं मन्यते। प्रतीतेश्चैवास्या भोक्ता सहृदय एव। परमिह तस्या निष्प्रत्यूहीकरणैकसाधनं गुणालंकारमयशब्दार्थात्मकं काव्यमेवास्ति। अतो रससिद्धान्ते न गौणं काव्यामाहात्मयम्। कथं वा तत् सम्भवति। तस्य हीदमेव जन्मभूर्वाधारभूर्वा, यद्विना तदस्तित्वमेव काल्पनिकीभवति। सहृदयस्य ग्रहणशक्तिवैकल्यमेव महान् रसप्रत्यूह इत्यसन्दिग्धम्। परमनेन काव्यसौन्दर्यास्त्विमेव न नश्यति। शंका चेयं निराकृता रसविघ्नप्रस्तावे तत्र हि कविः काव्यं वा नापराध्यति, सहृदयतेव तत्र दुष्यति। इति निरूपितं रसस्य प्रमातृगतत्वम्। वस्तुगतत्वकल्पनाऽपि भारतीये रसशास्त्रे न न वर्तते। भरतलोल्लटशङ्कुकैः प्रतिपादितो रसस्तु वस्तुगत एवेति निश्चितम्। रंगमञ्चे किलैष काव्यकौशलेन नाट्यपाटवेन वाऽसृज्यत, स चास्वाद्य एव भवति नास्वादः। जैनाचार्या अपि काव्यगतायां भावसामग्र्यामेव रसस्थितिमपश्यन्। कविगतत्वकल्पनापि रसविषये न नूतना। यथा बीजाद् भवेद् वृक्षो वृक्षात्पुष्पं फलं यथा।तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः।।इति नाट्यश्भरतोद्धृतस्यास्य श्लोकस्य व्याख्यायामभिनवेनानन्दवर्धनं प्रमाणयता कवियतस्य रसस्य महत्वं स्फुटमुद्घोषितम्—

"कविगतसाधारणीयभूतसंविन्मूलश्च काव्यपुरस्सरो नटव्यापारः। सैव च संवित् परमार्थतो रसः। सामाजिकस्य च तत्प्रीत्या वशीकृतस्य पश्चपादपोद्धारबुद्ध्या विभावादिप्रतीतिरिति। तदेवं 'मूलबीजस्थानीयः कविगतो रसः। कविर्हि सामाजिकतुल्य एत तत

एवोक्तं ततो वृक्षस्थानीयं काव्यम्। तत्र पुष्पादिस्थानीयोऽभिनयादिनटव्यापारः, तत्र फलस्थानीयः सामाजिकरसास्वादः तेन रसमयमेव विश्वम्।"

इत्यस्याः कविगतरसव्याख्याया अनन्तरं श्रीमर्द्धेकराक्षेपोऽनायासमेव निराक्रियते। इहोदाहृतपूर्वे मांसभक्षणप्रसंगे कवेरनुभूतिरेव मूलरसः। सहृदयस्यानुभूतिस्तामनुसृत्यैव रसं निश्चिनुयात्। काव्यगतस्थायिभावाभिप्रायः प्रतिपात्रं स्थायिभाव इति नावगन्तव्यम्ना। अपि तु कविगतः स्थायिभाव एवानेनाभिप्रेतः। यदि जुगुप्सा कवेर्भावस्तदा सहृदयोऽपि जुगुप्सामनुभवेत् बीभत्सरसं वा। कवेश्च यदि क्रोधभावस्तदा क्रोधं रौद्ररसं वा, यदि च भयं तदा भयंभयानकरसं वा। प्रकाशितमिदंतथ्यमस्माभिः साधारणीकरणप्रकरणे।

रसाभिव्यक्तिविरोधोऽपि भारतीयकाव्यशास्त्रे न नूतनः। ध्वनिस्थापनात्प्रागुल्लोल्लटशंकुकाभ्यां पश्चाच्च भट्टनायकमहिमभट्टधनञ्जयप्रभृतिभी रसाभिव्यक्तिः प्रत्यक्षतोऽप्रत्यक्षतश्च निषिद्धा। स्वयं भरतमतमपि तां विरुणद्धि। भरते वस्तुतो निर्मितिरेव निष्पत्तिपदार्थः। निष्पत्तिपदार्थं हि विशदयितुं तेन षाडवादिरसो निदर्शितः, तेनासन्दिग्धतया तन्मतेन रसास्वादस्य मिश्रानुभूतित्वमुद्भवति, यत्राधारभूतेन स्थायिना साकं काव्यनाट्यसौन्दर्यानुभूतयोऽपि मिश्रिता भवन्ति, यथा षाडवादिरसास्वादेऽन्नास्वादेन सह द्रव्यव्यञ्जनौषध्यादिस्वादोऽपि मिश्रितो भवति। लोल्लटेनाप्युपचितिं प्रकल्पयतेदमेव मतं समर्थितम्, भट्टनायकेन चाभिव्यक्तिं निरस्यता भुक्तिः स्थापिता—भट्टनायकमतेन सहृदयो रसत्वेन यं स्थायिभावं भुङ्क्ते, स शुद्धो रत्यादिरभूत्वा संवलितो भवति, स पाश्चात्यकाव्यशास्त्रनिरुपितस्य कलात्मकभावस्यैव पर्यायः। अतो रसशास्त्रे निर्मितिधारणा नाज्ञातरा। किन्त्वनेन रसाभिव्यक्तिसिद्धान्तस्य सर्वथाऽमान्यत्वसकथमं न संगच्छते। येनाधुनिकेनालोचकेनातिनिर्भ्रान्ततया काव्यास्वादस्य शुद्धानुभूतिममन्यमानेनासावनुभूतीनामेकं विधानमित्यमानि, तद्विश्लेषणेनाभिव्यरपि सिद्ध्यति। डा. रिचर्डसेने काव्यास्वादप्रक्रियां विश्लेषयता षडवस्थानान्यमानिषत—चाक्षुषसंवेदनम् (बिम्बविधानम्), सम्बद्धबिम्बविधानम्, स्वतन्त्रबिम्बविधानम्, विचारः, भावोद्बोधनम्, दृष्टिनिर्माणञ्चेति। एतद्विश्लेषणानुसारेण काञ्चिन्मुद्रितां, लिखितां वा कवितामधीयानस्य पाठकस्य मनसि प्रथममक्षरबिम्बाउल्लसन्ति, ततस्तद्रूपाकृतिनादसम्बद्धा बिंम्बाः तदनु, तदक्षरनिर्मितशब्दप्रसिद्धवाच्यार्थ सम्बद्धबिम्बा ये पूर्वापेक्षया स्वतन्त्रा भवन्ति, ततः परमिदं

शब्दार्थसमन्विततया पाठकस्य कल्पनाविचारौ जाग्रतः, युगलतया तदभावा उद्‌बुध्यन्ते, अन्ते चास्याः प्रक्रियायाः संयुक्तः परिणामो भवत्येकस्य मनोदशा विशेषस्य निर्मितिः। इत्थं कवितया प्रमातृभावोद्‌बोधस्तु मनोवैज्ञानिकानामपि मान्यः, न खलु मनोविज्ञानं निषेधति भावोद्‌बोधम्, तत्रापि नूनं मानवचेतनायाः कतिपयुयः प्रवृत्तयः स्थिरवृत्तितया कल्प्यन्ते। कवितया प्रमातृचेतनायामुद्‌बुद्धो भावो भावशबलता वा तस्य स्वकीयो भावोऽनुभवो वेति निश्चप्रचम्, कवेर्भावोऽनुभवो वा तस्य प्रेरको निमित्तं वाऽवश्यं भवति, परं कविभाव एव प्रमातृचेतनायां यथावन्न सञ्चरति, स्थानान्तरितीभवति वा, नापीदं सम्भवति। अत्रैव वयमभिव्यक्तिसम्प्रेषण (सञ्चार) सिद्धान्तविवादसीमसु प्रविशामः, पुरश्चास्माकं पुनरप्येष प्रश्न उपतिष्ठते यत्काव्यानुभूतिर्वा भवति रससम्प्रेषणं वा, रसाभिव्यक्तिर्वेति। समाहितश्चास्माभिरेष प्रश्नो यथावसरम्। अत्र तावदिदमलं स्यात्, यदभिव्यक्तिसिद्धान्ते प्रमातृचित्ते यस्या अनुभूतेरुदयस्य कल्पना निहितास्ति, सा किल कवेरनुभूतेः स्वतन्त्रा भिन्ना वा न भवति, कवेरनुभूतिरेव तन्मूलम्, अतः सा कल्पितानुभूतेः समानप्रायैव। तथैव सम्प्रेषणेन सञ्चारणेन वा नेदमभिप्रेतं यत्प्रमातृचित्ते कवेरनुभूतिर्यथावत्संप्रेषिता स्थानान्तरिता वा भवति, प्रमाता च कवेरनुभूतिमेव स्वदते न स्वानुभूतिमिति। आई. ए. रिचर्ड्सेनातिनिर्भ्रान्तशब्दैरेषाऽनर्गलकल्पना प्रत्युदिता। सञ्चारणसिद्धान्तस्यापीदमेव प्रतिपाद्यम्, यत्पठितकिञ्चित्कविताकस्य पाठकस्य प्रमातुश्चित्ते तत्कविताभिव्यक्तकविमूलभावनानुभूति समानैवानुभूतिरुदयते, न सैवानुभूतिः सञ्चरति। सञ्चरितुं वा नैव प्रभवति। इति उभयत्र हि सन्निहिता समानानुभूतिकल्पना, नापि सम्प्रेषणसिद्धान्तोऽभियुनक्तीदम्, यत्काव्यास्वादे प्रमात्रा कवेरनुभूतिमात्रमास्वाद्यते, न भवति तत्र प्रमातृस्वानुभूतियोग इति। नापि चाभिव्यक्तिवादः प्रस्तौतीदम्, यत्प्रमाता कवेरनुभूतेः सर्वथा स्वतन्त्रां शुद्धां स्वानुभूतिमेवास्वदत इति। अयमत्राभिसन्धिः यथा निर्मितिसम्प्रेषणस्थापनाभ्यामभिव्यक्तिनिरासेन 'रससिद्धान्तस्य' तावदमान्यता न सिद्ध्यति, यतो हि रसाभिव्यक्तिरेकान्ततो निषेद्धुं न शक्यते, नापि चाभिव्यक्तिकल्पनायां निर्मितिसम्प्रेषणकल्पनयोः सर्वथाऽभावः। रससिद्धान्तो हि जीवनस्थायिमूल्यान्याधृतम्, अद्य च विघटितेयं स्थायिधारणैव। अद्यतनजीवने सर्वथाऽऽस्था एव विघटिता, अतोऽद्यतनकविता स्वानन्दवादिमूल्याधृतो रससिद्धान्तो निरर्थकः।

आस्थाप्रश्नश्च व्यापकः प्रश्नविशेषः, यो न काव्येनैव, अपितु कृत्स्नेन जीवनेन सह सुदृढं सम्बद्धः। नास्त्यत्र सन्देहो यदद्यतनजीवने यावद्भयमभिव्याप्तम्, तावदैतिहासिके कस्मिंश्चिदपि युगे नाभूत्, यदा च मानवतास्तित्वमेव प्रतिक्षणं भयाक्रान्तं तदास्थानां किमवलम्बनं स्थितम्? तस्मादियमनास्था तज्जन्यो विषादश्चाद्यानुभूयमानं तथ्यमस्ति, यतः कस्यश्चिदपि वास्तविकस्य कलाकारस्य त्राणं न सुलभम्। पुनश्चाहं पृच्छामि किमद्य वस्तुत एवास्थानां विघटनं सवृत्तमिति। यद्येवं तर्हि किमेतेषां प्रभावविस्तारशक्तिसङ्घटनशान्तिसुरक्षाणां विश्ववर्तिनां प्रयत्नानां प्रयोजकम्। किं सर्वनाशविषयकमिदं भयमेवास्माकं जिजीविषां नोत्तेजयति, किञ्च जिजीविषातीव्रतैवास्थानामनिवार्यतां न साधयति। किमद्यतनीषु सम्भावनासु प्रलयसम्भावनैव काम्यतरा। सर्वनाशभयादेकत्र मानवसमाजस्य सार्वभौमसङ्घटनसम्भावनायाः किमपि नास्ति मूल्यम्। सम्भावने तूमे एव सम्भवतः। इदञ्च भवत्स्वधीनम् यत्करामप्येकतर भवन्तश्चिन्वन्ति। यद्यत्रैवाग्रहः यत्प्रलयभयमेवाद्यतनमेकं सत्यम् तस्याभिव्यक्तिः पारमार्थिकी कलेति, तदा नैष रससिद्धान्तस्यापराधः। नैतदात्मघाति नैराश्यमपि रसपरिधिमतिक्राम्यति, अस्ति चेद्भवति वस्तुतस्तस्मिन्नैराश्ये रमणीयरूपप्रदानक्षमत्वम् तर्हि वस्तुतो रससिद्धान्त एव भवदीयतैत्कलामूल्यांकेन कुशलम्। तथापि व्यापिकया दृशाहमत्र तावदेतावन् निवेदनं प्रस्तौमि यद्येषां चेतनाऽनाविलतरा, विचारणाय स्वस्थतरा ते भवद्भिः सह सम्मता न सन्ति। यावज्जीवमियमास्थाऽपरिहार्या, यदि च जीवनं एव नास्ति विश्वासः तदा कलां प्रति विश्वासेनाप्यलम्। अस्यैवाक्षेपस्यायमपरः पक्षोऽस्ति यद्रसपारिपाकाय न स्थायिभावस्य सद्योऽनुभूतिरपेक्ष्यते, अपि त्वतीतसंस्कारवासने एवापेक्षिते। यदा चाद्यतने जीवने क्षणमेव सत्यम्, अद्यतनी च कविता न सद्योऽनुभूतिः, अपि त्वनुभूयमानक्षणस्यै व सेति। परमिदं वाग्विलासमात्रम्, तथ्याद्भिन्नं सिद्धान्तस्य कल्पनात्मकं प्रतिपादनम्। नास्ति क्वापि जीवनक्षेत्रेऽनुभूतिकर्मणोः भोगसर्जनयोश्च युगपदस्तित्वम् इति नूनमयं प्रकृतिनियमः। अतः काव्यस्य सृष्टिरपि न सम्भवति अनुभूतिभोगावस्थायाम्। अथानुभूतक्षणस्य शब्दबन्धनमेवैतावद्दुष्करञ्चेत् तदा कथं बध्येत शब्देष्वनुभूयमानः क्षणः। अनुभूयमानभावस्य संवेदनातिरिक्ताकापि नास्ति स्थितिः नास्त्यत्र संशयः सूक्ष्मचेतसः। कलाकारस्य कल्पनानान्यरूपसंवेदनान्यपि रूपयितुं प्रयस्यति परं रूपायितमात्राण्येतानि तावदनुभूतान्यपि भवन्ति।

अनुभूयमनस्य रूपणमेवानुभूतिः यत्र वर्तमानः क्षणोऽस्तीती भवति। इयमेव सहजानुभूतिरिति क्रोचेमतम्। क्रोचेऽनुसारेण सहजानुभूतिरेव कला। परमस्याः कलायाः स रूपद्वयं मन्यते—आन्तरिकमाद्यम्, व्यावहारिकमपरम्, सहजानुभूतिस्तावदान्तरिकमेव रूपं कलायाः, यद्वैवश्येन कलाकारस्य चेतनायां घटते। व्यावहारिक्या दृशा नेयं कला, अपितु तत्प्रकल्पना। व्यवहारे या कलेत्युच्यते, या विवेचनाविषयः, सा नामास्याः सहजानुभूतेर्मूर्तोपकरणानां प्रस्तुतिः यां कलाकारो यथेच्छं स्वकीयातीतसहजानुभूतामेव साधयति, अतोऽनुभूयमानक्षणनुभूतिकल्पना न सिद्ध्यति, सर्जनापुनःसर्जने अनुभूतस्यैव सम्भवतः। इत्थं पूर्वमसम्भवं परिकल्प्य, पाश्चात्त्यछब्दस्ययोऽनादिकालान्मानवजीवनाभिव्यक्तेः समर्थतरं साधनमस्ति—सर्वाधिकवेध्योपकरणमिति व्यपदेशेनासाध्यसाधश्रेयोभागित्वं बुद्धेश्चमत्कारस्तु मन्येतैव, परं काव्यसत्यरूपतया तस्य मान्यतानयनं न सम्भवति।

अयमाक्षेपो नैतिकत्वमूलकः प्रतियुगञ्च नानारूपैर्जीवने काव्ये चानन्दवादं विरुणद्धि। अस्येदमेकमुत्तरम्—भारतीयदर्शने काव्यशास्त्रे चानन्दस्य यद्रूपं कल्पितम्, तन्मानवचेतनायाः पूर्णविकासस्य पर्यायः। मानवव्यक्तित्वस्य सर्वांगीणोत्कर्षस्य भावात्मकं रूपमास्वादोवाऽऽनन्दो वेत्येव, नायं विषयभोगसुखमनोरञ्जनविनोदास्वादानां पर्यायः। आनन्दस्यास्यां सर्वांगीण कल्पनायामाधृतत्वेन रसपरिधौ मानवचेतनायाः मधुरकटुकाः, सुखदुःखमयूयश्च सर्वाअपि वृत्तयोऽनायासमन्तर्भाविताः, न तत्र केवलमानन्दस्य सिद्धावस्था, साधनावस्थापि कात्स्न्यैनोररीकृता।

शास्त्ररूढिमुक्तो रससिद्धान्तः स्वकीयेन व्यापकेनविकासशीलेन च रूपेण काव्यस्य सार्वभौमसिद्धान्तोऽस्ति। यमाधृत्य प्रतिदेशं प्रतिकालं सर्जनात्मकस्य साहित्यस्य तस्य प्रत्येकस्याः विधायाः समुचितं मूल्यमंकयितुं शक्यम्, एतत्प्रकल्पना तथा सर्वांगीणाऽस्ति यथा मानवचेतनाया मूलवृत्तिं रागं—धुरं विधायैष सकलान्यपि प्रमुखानि अंगान्तराणि यथौचित्यमंगीकरोति। अथो रससिद्धान्तो जीवनस्याखिलै रूपैर्विविधैर्विर्मूल्यैश्चकृत्स्नतया समञ्जितो भवति। यत्र विभिन्नानां वादानामन्तर्विरोधाः समाधीयन्ते। सुदृढे हि मानववाधारे प्रतिष्ठितो रससिद्धान्तः। अयं मानवं, तद्देहात्मानौ, तच्छक्तिसीमानौ, तद्रागद्वेष चेतिं समस्तं सहैव स्वीकरोति।

# ख-उपसंहारः

भारतीये काव्यशास्त्रे रसो ब्रह्मानन्दसहोदरत्वेन मतो न च ब्रह्मानन्दः। परं तादृशः सन्नपि सोऽलौकिको मतः। लौकिकविषयपरिधिगतो न रसस्तस्मात् तत्रालौकिकत्वमेवापादयूडं स्वस्थ सत् सन्तिष्ठते। लौकिकाः पदार्थाः वर्तमानभूतभविष्यत्कालगताः सन्ति। परं रसस्तु य आनन्दमयः प्रकाशमयश्च, न कस्मिंश्चित्कालविशेषे स्वां स्थितिं निदधात्यपि तु सः सर्वकालगतः। रसस्य कार्यत्वाद् ज्ञाप्यत्वाच्च तस्य वर्तमानकालगता, न सः कार्योनचज्ञाप्योऽतस्तस्यावर्तमानगतत्वमपि सिद्ध्यति। रसो नित्योऽपि न, विभावादिज्ञानात् प्राक् तस्य सत्ताया एवासम्भवात्। रसौ लौकिकविषय इव न परोक्षज्ञानं नापरोक्षज्ञानम्। साक्षानन्दविषयत्वात् स न परोक्षो भवितुं सुशकः शब्दविषयत्वाच्च न सोऽपरोक्ष एव वर्तते। एतामेव मान्यतां काण्टः, शिलरः, हीगेलोऽन्ये च कतिपये तद्विषये निदधते। क्रोचे काव्यानन्दमिमं रहस्यवादिसौन्दर्यत्वेन जानाति। एतस्याध्यात्मवादिसौन्दर्यदर्शनस्य, गच्छता कालेन, प्रबलतया विरोध उत्थितः मार्क्सः फ्रायडश्च स्वसिद्धान्तं प्रकाशयन्तौ सौन्दर्यानुभूतिं व्याख्यातवन्तौ। मार्क्समतेन कलायाः अनुभूतिरार्थिकहितानुशासितभौतिकानुभूतिरस्ति। परं फ्रायडस्य विचारेण सा कामप्रेरितेन्द्रियास्वादः। प्रतीच्यानां बुधानां कृतिषु तदनुभूतेर्हि बौद्धिक्यो नैतिक्यो मनोविज्ञानिक्यश्च व्याख्याः बभवुः। काव्यानन्दः कल्पनापरक आनन्द इत्येतद् एडिसनोऽयकथत्। तन्मतेन केनचन मूलभूतवस्तुना कयाचन च कल्पयानुगम्यमानयोः रूपयोमर्ध्ये प्राप्यमाणस्य साम्यस्य विभावनेन यः आनन्दः उपलभ्यते स भवति कल्पनाविषयक आनन्दः। काव्यानन्दः कल्पनानन्दः एव। स तमैन्द्रियादाध्यात्मिकाच्चानन्दाद् भिन्नमेवावगच्छति। सहजानुभूतिपरक मत वस्तुतो न स्वतन्त्रं मतम् एडिसनस्यैव कल्पनानन्दो दार्शनिकरूपत्वेन प्रस्तुतीकृतः।

काव्यानन्दोऽनिर्वचनीयो विलक्षणः आनन्दः। सर्वविधेभ्यो लौकिकेभ्य आध्यात्मिकेभ्यश्चानुभवेभ्यः स भिन्नः। एतां

प्राच्यपरम्परागतां मान्यतां ब्रेडले, क्लाइवो, वेलश्च कलावादिनः स्वीकुर्वन्ति। इत्थं प्रतीच्यानां विचारकाणां मतेन काव्यानन्दः ऐन्द्रियादाध्यात्मिकाच्चानुभवात् कल्पनाविषयको विलक्षण एव आनन्दः सिद्ध्यति। आलोचकमूर्धन्यस्य आई. ए. रिचर्ड्समहोदयस्य मतमुल्लेखनीयमस्ति। तद् यथापेक्षं पुष्टतरं मनोविज्ञानशास्त्रानुकूलञ्च वर्तते। तन्मतेन काव्यानन्दोऽनिर्वचनीयो विशिष्टश्चेत्येतत्कथनं न युक्त, यतो हि सानुभूतिरपि साधारणेन्द्रियद्वारेणैव प्राप्यते। तस्माद्धेतोः काव्यानुभूतिरपि ऐन्द्रियानुभूतेर्न पृथगित्येतत् स ब्रूते। वस्तुतस्त्वस्यामनुभूत्यां चित्तद्रुतिविस्तारादिकमानसिकसंवेदनास्तु घटन्त एव, एवावदेव न तत्र रोमाञ्चाश्रुवादिशारीरिक्यः संवेदनाः अपि भवन्त्येव। सत्यप्येतादृशे तथ्ये, ज्ञातव्यमिदमस्त्यत्र—लोके प्रियजनस्पर्शेणास्मच्चित्तं द्रुतिमस्मद्वपुश्च रोमाञ्च गच्छति। तद्द्रुतेः किञ्च रोमाञ्चस्यानुभूतिर्नूनं रंगमञ्चाद् वा काव्यपठनात् प्राप्ताया द्रुतेः किञ्च रोमाञ्चाद् भिन्नविधैव भवति। न तत्र तावत् प्रत्यक्षत्वं भवति न च तीव्रतम्। तत्र कस्यापि न्यूनतरन्यूनतमस्यांशस्य भिन्नतावश्यमेव भवति। काव्यानुभवस्य प्रत्यक्षघटनाजनितानुभवाभावात् सोऽनुभवस्तु भावितघटनाया अनुभवो भवति। अतः काव्यानुभूतिः साधारणेन्द्रियानुभूतिर्न सा भावितेद्रियानुभूतिर्वर्तते। तदेवं पश्चिमीयानां विचारकाणां विचारानुसारेण एव हि काव्यानन्दो लौकिक एव सिद्ध्यति। परं सर्वेऽपि लौकिका आनन्दा न भवन्ति सामान्याः। तेषां भवन्ति कोटयो बहुलाः। सूर्याराधने य आनन्दः सः स्वकीयं विशिष्टत्वं निदधाति। सुस्वादुभोजनं यमानन्दं बिभर्ति तमेवानन्दं गणित-राजनीतिपरकप्रश्नानां समाधानं न निधत्ते। एते सर्वेऽपि भौतिका आनन्दाः स्वकीयां स्वकीयामेव विशिष्टतां कोटिञ्च धारयन्ति। काव्यानन्द एतेभ्यः सर्वेभ्य आनन्देभ्यो विशिष्टतम आनन्दः। परमयमाध्यात्मिकानन्दोऽपि न, स तु नैजमेव वैशिष्ट्यमश्नुते। न च स ऐन्द्रियानन्द इव। स तु इन्द्रियगोचरानान्दान् अतिशेते। स तद्विधान् सर्वान् लौकिकनान्दानभिभवति। तद्गत आनन्दस्तत्तद्गतेभ्य आनन्देभ्योऽन्यविधः। न च स ब्रह्मानन्द एव, अत एव तु स ब्रह्मानन्दसहोदर इति साहित्याचार्या वदन्ति। स तैर्लोकोत्तरत्वेन मतः। परं लोकोत्तरशब्दस्य तात्पर्यमलौकिकं न मन्तव्यमपितु लौकिकानन्दातिशायी आनन्दः स इति ज्ञेयम्।

भरतकृते 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति' रित्येतस्मिन् सूत्रे भट्टलोल्लटादिका आचार्या येन प्रकारेण व्याख्यां विदधति सा च व्याख्या क्वाप्युपरि यथास्थानं निर्दिष्टास्ति। तत्तदाचार्यकृतासु व्याख्यासु समीक्षकाः कांश्चन दोषानपि दर्शयन्ति। अत्र कस्याचार्यस्य व्याख्यायां को दोष इत्येतस्य विषयस्य चर्चा क्रियते। एतेन रसमवगन्तुं साहाय्यमन्यदपि प्राप्तं भवति।

भट्टलोल्लटकृतां भरतसूत्रव्याख्यां समीक्षमाणानां समीक्षकाणां कथनस्यैषः सारः—

तत्र प्रमुखतया अनुकार्ये, गुणीभावेन च नटे रसस्योत्पत्तिरभिव्यक्तिः पुष्टिश्च मता। परं सामाजिकः कथं रसमनुभवत्येतस्याः समस्यायास्तत्र समाधानं न दृश्यते। अथ च रामादिकास्त्विदानीं न सन्ति, अतो वर्तमानसमये क्रियमाणैरभिनयैस्तेषु रसोत्पत्तिः संगच्छत एव न, अतस्तदनुकर्तरि नटे च रसोत्पत्तिर्न भवितुमर्हति।एतौ स्तौ द्वौ दोषौ आचार्यलोल्लटस्य व्याख्यायाम्।

आचार्यशङ्कुकस्यापि व्याख्या न वर्तते निर्दोषा। सामाजिको रसस्य साक्षात्कारं करोतीत्येतन्न सम्यगुपपादितम्। अनुमानेन यज्ज्ञानं भवति तद् भवति परोक्षम्। साक्षात्कारत्वं न तत्र दृश्यते अतः अनुमितिवादस्यास्त्ययं महान् दोषः। अनुमितिवादाधारे रसास्वादनं न युक्ततयोपपादयितुं शक्यम्।भट्टनायकस्य च व्याख्यायां दोषः प्राप्यते। भट्टनायकेन भावकत्वभोजकत्वव्याख्ययोर्द्वयोर्व्यापारयोः कल्पना कृतास्ति। तदीयौ कल्पितौ द्वौ व्यापारौ नानुभवसिद्धौ स्तः।

यस्य च स्थायिभावस्य भोगो निर्दिष्टः स रामसीतादिगतः स्थायिभावो वा नटगतो वा सामाजिकगत इत्येतस्यापि स्पष्टीकरणं नास्ति। ईदृशो दोषस्तत्र संलक्ष्यते।आचार्योऽभिनवगुप्तः स्पष्टतया सामाजिकगतः स्थायिभाव एव रसानुभूते निमित्तं भवति इत्येतदुपपादयति। स भट्टलोल्लट-शङ्कुकभट्टनायकानां मतानि सम्यगालोच्य स्वकीयमुक्तं सिद्धान्तं प्रतिष्ठापयति स्म।परवर्तिन आचार्याः रस इत्येतस्मिन् तत्वभूते शब्दे रसभावादिकानष्टापि समावेशयन्त्यतो रसः 'रसादि' रिति व्यवह्रियते।रसादिकं ध्वनेर्भेदत्वेन मत्वा आनन्दवर्धनो रसादेः सर्वेष्वप्युदाहरणेषु व्यंग्यार्थोऽनिवार्यतया विराजते इति वदति। स मन्यते यद् वाच्यार्थस्य प्रतीतेरनन्तरं सहृदयो रसमास्वादयितुं नैव शक्नुते।

रसस्य स्वशब्दोक्तिः (रसदोषः) उक्तायां धारणायां विद्यते। स्वशब्दतामुल्लिखन्नुद्भटः सर्वप्रथमं रसवदलंकारस्य लक्षणं प्रस्तुतीकुर्वन् दृश्यते।

किञ्च स्थायिभावसञ्चारिभावविभावानुभावसात्विकभावानां स्वशब्देन कथनं चापि कृतं स्यात्।उदाहरणमिदं रसवादिनां मतेन रसस्यास्ति, अलंकारवादिनां च मतेन रसवदलंकारस्य। परमत्र विचारणीयोऽयं विषयः किं कस्याञ्चन रचनायां सरसायां रसादेः स्वशब्दोक्तिरनिवार्यास्ति ? उद्भटस्य टीकाकारः प्रतिहारेन्दुराज उक्तेषु पद्येषु विभावादिपञ्चतत्वानां स्वशब्देनोक्तिं निर्दिशन् लिखति—

अत्र कन्दर्पः (रतिः) स्थायिभावः, औत्सुक्यचिन्ताप्रमोदाः सञ्चारिभावाः, स्वेदपुलकादिकाः सात्विकभावाः इत्येते, पार्वती शिवश्च इत्येतदात्मकौ विभावोऽपि स्वशब्देन कथिताः सन्ति। इत्थमिह उद्भटसम्मतरसवदलंकारस्योक्तं लक्षणं चरितार्थीभवति। उद्भटप्रतिहारेन्दुराजयोरेतेन वक्तव्येन उद्भटस्य समयं यावद् रसवदलंकारस्योदाहरणेषु विभावादेः स्वशब्दोक्तिरनिवार्यतया स्वीकृताऽभवदिति निष्कर्षो निर्गच्छति।

आचार्य आनन्दवर्धनो यद्यपि कथितं रसदोषं स्पष्टतया नोल्लिलेख, परं 'रसो वाच्याश्रितो न भूत्वा व्यङ्ग्यस्थितो भवति' इति तदभिमतम्।

सः प्रकारान्तरेण दोषस्यास्य चर्चामवश्यं कृतवान्। अस्मिन् विषये तन्मतमिदम्—

कस्यामपि रचनायां विभावादिविषयिणी परिपक्वसामग्री चेत् स्वसद्भाव न निदधाति, रसादेर्नामोल्लेखमात्रेण रसानुभूतिर्न भवितुमर्हति। ध्वन्यालोके लिखति—'न केवलं श्रृंगारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसवत्वप्रतीतिरस्ति।'1ततश्च कुन्तक उद्भटस्योक्तं कथनमुल्लिखन् तत्रत्यावच्यौ। तन्मतस्यायं सारः—रसादेः स्वशब्दोक्तिद्वारेण चेद् रसचर्वणायाश्चमत्कारः स्वीक्रियते तदा तु घृतपूरा नामग्रहणेनैव तदीय आस्वादः प्राप्तव्यः परं तथात्वं न दृश्यते यद्यपि कश्चित्—

'स्वशब्दस्थायि-सञ्चारिभवाभिनयास्पदम्' इत्यनेन पूर्वमेव लक्षणं विशिनष्टि। तत्र स्वशब्दास्पदत्वं रसानाम्। यत्तुस्वशब्दैरभिधीयमानाः श्रुतिपथमवतरन्तश्चेतनानां चर्वणचमत्कारं कुर्वन्तीत्यनेन न्यायेन घृतपूरप्रभृतयः पदार्थाः स्वशब्दैरभिधीयमानास्तदास्वादसम्पदं सम्पादयन्ति।कुन्तकानन्तरं मम्मटो रसादेः स्वशब्दवाच्यतां

रसदोषेष्वजीगणत्। स दोषस्यैतस्य प्रेरणामानन्दवर्धनात् प्राप्तवान् इत्येतत् कुन्तकस्याभिहितात् प्रसंगादनुमीयते।

मम्मटमनुसरन् विश्वनाथश्च दोषमिमं वर्णयामास। रामचन्द्रगुणचन्द्रौ मम्मटस्य प्रसंगमिमं विलोक्य तत्र स्वकीयामसहमतिं प्रदर्शयन्तौ न तस्मिन् दोषे स्वमतिं निबबन्धतुः। केचित्तु व्यभिचारिरसस्थायिनां स्वशब्दवाच्यत्वं रसदोषमाहुस्तदयुक्तम्, व्यभिचार्यादीनां स्ववाचकप्रयोगेऽपि विभावपुष्टौ। तथाहि–

दूरादुत्सुकमागते—इत्यादिश्लोके उत्साहाख्यस्य सञ्चारिभावस्य स्वशब्दवाच्यरूपे प्रयुक्ते सत्यपि रसोत्पत्तिर्भवत्येव। प्राणान् चेतनतां वा साहित्यशास्त्रम् 'आत्मा' इत्येतेन शब्देन व्यवहरति। तदर्थमेव तत् आत्मेति पदं प्रयुनक्ति।

'काव्यस्यात्मा' इत्येतेन काव्यस्य तत्वं वा सार इत्येषोऽर्थोऽभिप्रेतः। आत्मास्ति तत् तत्वं येन काव्यं काव्यत्वमाप्नोति। तद्द्वारेण सहृदया वा दर्शकाः वा श्रोतारो वाध्येतारः काव्यस्य प्रमुखप्रयोजनभूतकाव्यानन्दं वा रसमनुभवन्ति। निःसंशयम्, काव्ये आत्मा इत्येषः शब्दो वाचकत्वेन न प्रयुक्तो भवन् लक्षकत्वेन प्रयुक्तोऽस्ति। तस्य वाच्यार्थतास्ति चेतनता वा ज्ञानं, परमिह तल्लक्ष्यार्थः काव्यस्यानिवार्यतत्वम्।

यथा दैनिककार्यकलापप्रयोजनेन चेतनता वा जीवनम् (प्राणाः) अनिवार्यतयापेक्ष्यते तथैव काव्यशरीरप्रसंगे 'रसः' अनिवार्यसाधनत्वात् आत्मेति मतः। दैनिककार्यकलापे चेतनतास्ति यथा साध्यभूता वा सिद्धिभूता तथैव रसोऽपि वर्तते साध्यभूतः सिद्धिभूतो वा। द्वयोरपि साधनमस्त्यात्मा शरीरपक्षे चेतनता यास्ति, काव्यशरीरपक्षे सैव तत्वमिति प्रोच्यते। तत्वमित्यत्र विमर्शणमपेक्ष्यते।

काव्ये आत्मेति शब्दः काव्यस्यानिवार्यव्यापकाभ्यन्तरसारो वा तत्वमिति ज्ञेयम्। तत् तत्वं तत्र साधनत्वेन समुपतिष्ठते। चेतनता वा ज्ञानं वा आत्मा किञ्च साध्यत्वेन क्रियाकलाप इत्येतावुभावपि मूलत एक एव। अतः आत्मा स्वयंसिद्धत्वेन मतं भवितुमर्हति। पर 'कार्ये कारणोपचारो न सामान्यरीत्याभ्युपगम्यते। अत एव एकत आत्मन एकस्तिंल्लक्षणे स (आत्मा) साधनत्वेन स्वीकृतोऽस्ति-इन्द्रियाधिष्ठातेति कथितः। अतोऽधिष्ठातृत्वेन तस्य कारणत्वमस्ति। इन्द्रियजन्यश्च कार्यकलापः कार्यत्वेनसाध्यत्वेन–मतो भवति।

काव्यशास्त्रे 'आत्मेत्यस्य' प्रयोगः सर्वप्रथमं वामनेन रीतेः काव्यस्यात्मत्व प्रतिपादने कृतः। 'रीतिरात्मा काव्यस्येति' न

निजगाद। आनन्दवर्धनो ध्वनिः काव्यस्यात्मत्वेन मेने। स आह–'ध्वनिरात्मा काव्यस्य' इति। विश्वनाथस्तु रसं काव्यस्यात्मत्वेनामस्त। स आह–'वाक्यं रसात्मकं काव्यम्'2 इति। आचार्यकुन्तको वक्रोक्तिं काव्यस्यात्मेति जगाद। काव्यपुरुषरूपकप्रसंगे राजशेखरो हि सर्वप्रथमम् आत्मेत्येतच्छब्दं प्रयुयोज। यद्यपि आचार्यवामनकाले आत्मेति शब्दो विशिष्टनवीनार्थे पूर्णतया स्थिरतामगमत् परं काव्ये किमपि न किमपि तत्वमनिवार्यतया स्वतां निदधातीत्येषा धारणा प्रबलतया मान्याभवत्। भामहदण्ड्युद्भटवामनमतेन तत् तत्वम् अलंकारोऽस्त्यतोऽलंकारे एव मतिर्निबद्धाभूत्। परमग्रे ध्वनिर्ध्वनिकारमतेन, वक्रोक्तिर्वक्रोक्तिकारमतेन, रसो विश्वनाथमतेन आत्मत्वेन मान्यतामयासिषुः। अलंकारवादिन आचार्याः काव्यस्य सर्वान् शोभाकरान् धर्मान् अलंकार इति नाम्ना व्याजह्रुः। तत्र दण्डी कथयति—

'काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते'3

दण्डी अनुप्रासोपमादीनां तु काव्यशोभाकरधर्मत्वात् अलंकारत्वेन तान् वदत्येव परं स गुणरसभावरसाभासभावाभासप्रभृतीनपि अलंकारत्वेन प्रब्रवीति।

भामहादिकालंकारवादिभिह का धारणेत्येतस्मिन् विषये प्रकाशक्षेपणं युक्तमत उपस्थियते तद्दिशायाम्– प्राच्या आचार्याः अंगिभूतरसं भावं रसाभासं भावाभासं भावशान्तिं च, परवर्तिन आचार्याः आनन्दवर्द्धनप्रभृतय इव रसभावादिनाम्ना नो व्यवाहरन्, पर क्रमेण रसवत् प्रेय ऊर्जस्विसमाहिताख्ययातान् व्यवाहार्षुः।

उद्भटस्तु अंगभूतान् एतान् द्वितीयोदात्तालंकारे समावीशित्। इत्याद्युक्त्योपमाद्यलंकाराणां तुलनायामनुप्रासादिकेष्वलंकारेषु स्थितेष्वपि माधुर्यादिदशगुणाश्च साधारणालंकारत्वेन मन्तुं शक्या इति प्रतर्क्यते।

दण्डी प्रबन्धकाव्यम् भाविकोऽलंकार इत्येतेन नाम्ना आनंक। यस्मिन् काव्ये कवेर्भावः (अभिप्रायः) समाप्तिं यावद् दृश्येत इत्येषा व्युत्पत्तिर्भाविकपदस्यास्ति। अस्मिन्नेव प्रसंगे दण्डिना महाकाव्यगतवस्तुपर्वणाम् (आधिकारिकप्रासंगिककथावस्तूनाम्) पारस्परिकोपकारितायाः किञ्च स्थानवर्णनार्हाणाम्–प्रकृतोपयोगिनां विषयाणां–वर्णनमप्यनुष्ठितम्। काव्यादर्शे सर्वमप्येतत् प्राप्यते।4काव्यशास्त्रसम्बद्धान् उपर्युक्तविषयान् व्यतिरिच्य दण्डी नाट्यशास्त्रसम्बद्धान् विषयानपि अलंकारत्वेन मेने।

सन्धि-सन्ध्यंग-वृत्ति-वृत्यंगलक्षणादिकानां सोऽलंकारान्तर्गततायां मनो निबध्नाति–

यच्च सन्ध्यंगवृत्यंगलक्षणाद्यागमान्तरे।
व्यावर्णितमिदं चेष्टमलंकारतयैव सः।।5

काव्यादर्शस्य प्रख्यातष्टीकाकारो रंगाचार्यो रेड्डी वदति यदेतेषु केषाञ्चनान्तर्भावो दण्डिस्वीकृतस्वभावाख्यानो (स्वाभावोक्ति) पमाद्यलंकाराणां मध्ये कर्तुं शक्यः, केषाञ्चन न समावेशो भाविकालंकारे, तत्र केषाञ्चन स्वभावाख्यानादावन्तर्भावः, केषाञ्चिद् भाविके इतियथायथविषयानुरोधेनभाव्यम्।'रंगाचार्यस्याभिप्रायोऽयमेतावान् षट्विंशल्लक्षणानामन्तर्भाव उपमाद्यलंकारेषु कर्तुं सुस्कः किञ्च सन्धीनां केषाञ्चिद् भाविके इति यथायथविषयानुरोधेन भाव्यम्।'6

इत्थं गुण-रस-ध्वनि-प्रबन्धकाव्यानि किञ्च नाट्यविषयानपि एवे अलंकारवादिनो अलंकारनाम्ना व्यवहरन्ति। तस्मात्कारणात् एतेषां मतेन अनुप्रासोपमादिका एव अलंकारा अपि तु काव्यस्य तानि सर्वाण्यपि तत्वानि वा अंगान्यलंकारा इत्युच्यन्ते यानि काव्यस्य चमत्कारोपपादकानि वा सौन्दर्यविधायकानि सन्ति।अलंकारवादिनोऽलंकारपदं व्यापकेऽर्थे प्रयुञ्जन्ति। काव्यस्य सर्वेऽपि शोभाकारका धर्माः सन्त्यलंकाराः इति तेषां विचारः।

अलंकारवादिषु सन्ति प्रमुखाः–भामहः,दण्डी,उद्भटश्च। जयदेवोलङ्कारवादिप्रतिपादितां मान्यतां न प्रस्तुवानः संलक्ष्यते। स तु ध्वनिं तदन्तर्गतं रसं स्वतन्त्रतया निरूपयति। ध्वन्यादिकाः अलंकारा इत्यत्र न तस्य मती रमते। परं हन्त मम्मटस्य काव्यलक्षणे न सोऽवहिततया दृष्टिं न्यदधात्। आचार्य मम्मटोऽनलङ्कृतीत्येतेन पदेन अलङ्कारस्य स्फुटतया स्थितिः स्यादेव इति नापेक्ष्यते इति वदति। स एवेदं ब्रवीति 'क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि' रिति।दण्डिभामहोद्भटाः अलंकारवादिनोऽलंकारालंकार्ययोः सम्यग् विवेचनं कुर्वाणाः प्राप्यन्ते ते तयोर्द्वयोरपि महत्वं समयगवेदिषुः।

रीतिसिद्धान्तप्रवर्तको वामनाचार्यः। अस्मिन् सिद्धान्ते स एव एकः संलक्ष्यते। तदनन्तरमपि तत्सिद्धान्तानुगामिनो नावाप्यन्त। 'विशिष्टरचनारीति' रिति स व्याजहार। सा तत्र विशिष्टगुणजन्या भवति। उक्तञ्च-'विशेषो गुणात्मेति। एतत्सूत्रमालम्ब्यैव रीतिगुणयोर्मध्ये अभेदः स्वीक्रियते। गुणो द्विविधः–(1) शब्दगुणः (2) अर्थगुणश्च।

शब्दगुणो दशविधोऽर्थगुणश्च दशविधः। एते द्विविधा अपि समाननामानः। नामानि सन्ति इमानि—

ओजः, प्रसादः, श्लेषः समता, समाधिः, माधुर्यम्, सौकुमार्यम्, उदारता अर्थव्यक्तिः, कान्तिश्च। नामभेदाभावोऽपि शब्दगुणा अर्थगुणाश्च स्वरूपतो लक्षणतश्च नितान्तभिन्नाः। उक्तगुणविशिष्टरीतिं काव्यस्यात्मत्वेन वामन आमनति। सा त्रिविधा— वैदर्भी, गौडी, पाञ्चाली च। वैदर्भ्यां सर्वे गुणा राजन्ते, गौड्यां द्वौ गुणौ-ओजः, कान्तिश्च। पाञ्चाल्यामपि द्वौ गुणौ स्तः माधुर्यम्, सौकुमार्यञ्च। ज्ञायते यदाचार्यवामनो रीत्यां द्वयोरपि शब्दार्थगुणयोः सद्भावमपेक्षिष्ट। स तासु रीतिषु वैदर्भीं श्रेष्ठामवगच्छति। तस्याः सर्वगुणवत्वात् तस्याः सर्वश्रेष्ठत्वं मतम्। शुद्धवैदर्भी इत्येषोऽन्योऽपि भेदो वैदर्भ्यास्तेन स्वीकृतः। समग्रगुणपरिपूर्णायां रचनायां समासस्याभावे सति, 'शुद्धवैदर्भी' भवति। उक्तञ्च—

'सापि समासाभावे शुद्धवैदर्भी'7

वामनः कस्मिन् आधारे रीतिं काव्यस्यात्मत्वेन स्वीकरोतीत्येष एव मुख्यः प्रश्नः। आधारद्वये विचारोऽयं कर्तुं शक्यः। प्रथम आधारः—'काव्यस्योपादानान्तराणां स्वाभीष्टकाव्यतत्वेऽन्तर्भूतता।'

आधारो द्वितीयः—'तैरुपादानैरस्य तत्वस्य पुष्टिः।'

अलङ्कारवादिषु दण्डी विशेषतः स्पष्टेषु शब्देषु प्रथममाधारमग्रहीत्। परं वामनः स्वयं नास्यां दिशायां कमपि सङ्केतं चकार। तथापि रीतेः स्वतन्त्रकाव्यसिद्धान्तत्वेन स्वीकृततायां 'रीतेरपरपर्यायभूविंशतिगुणभेदेषु कतिपयान्यशास्त्रीयकाव्योपादानानां कस्मिन्नपि न कस्मिन् रूपेऽन्तर्भावः कर्तुं शक्य इत्येतत् प्रमुखकारणमस्ति। आचार्यः मम्मट एतेषामेव विंशतिगुणानां प्रतिपादनमनेकधा कृतवान्। स माधुर्यौजःप्रसादेषु केषाञ्चन समावेशं, केषाञ्चन च काव्यस्यान्येषूपादानेषु चकार। तथाहि— आचार्यवामनसम्मतस्य शब्दगतश्लेषस्य, समाधेः, औदार्यस्य, प्रसादस्य च ओजस्यन्तर्भावो भवितुं शक्यः। वामनसम्मतौ शब्दगतमाधुर्यार्थव्यक्तिगुणौ मम्मटसम्मतयोर्माधुर्यप्रसादयोः समाविष्टौ भवितुमर्हतः। वामनाभिमताया अर्थगताया अर्थव्यक्तेः स्वभावोक्त्यलङ्कारे समावेशो भवितुं शक्यः। अर्थगतकान्तेः रसध्वनिगुणीभूतव्यङ्ग्येषु समावेशो भवितुमर्हति।

चेदेषा स्थितिर्मम्मटस्य न, वामनस्य दृष्ट्या विचार्येत तदा वामनाभिमतरीतिसम्बद्धेषु गुणेषु न केवलं माधुर्यौजःप्रसादाः मिलन्ति, अपितु एकतः स्वभावोक्तिरलंकार एकतश्च रसो

ध्वनिर्गुणीभूतव्यङ्ग्योऽपि अन्तर्गता जायन्ते, रसस्य समावेशस्त्विह भवत्येव। वामनो रसं स्पष्टशब्देष तत्र समाविष्टं कृतवान्–'दीप्तरसत्वं कान्ति' रिति। रसोऽस्ति य यस्य सद्भावं विना किमपि काव्यं जीवनं नाप्नुते, रसेन काव्यं प्राणवद् भवति, रसेन काव्ये जीवनश्रीः समुल्लसति। रसः काव्यं सहृदयहृदयप्रियं विदधाति। रसः काव्ये तमानन्दं सञ्चारयति य आनन्दोऽन्य विधान् सर्वानप्यानन्दान् अधरीकरोति, तमानन्दमनुभूय निपीय वा मानवो मोक्षेऽपि नादरधियं निबध्नाति। वस्तुतो रस एव काव्यस्य सर्वस्वं वर्तते अत एव कविस्तत्काव्यं सरसं विधातुं यतेत इत्येतदर्थं साहित्यशास्त्रं तं भूयोभूयः प्रेरयति।

रसस्तु वस्तुतः परमेश्वर एव, अतः काव्यमेव किं, किमपि न वस्तु तस्य परमेश्वरस्य सद्भावं विना कदापि कमपि न प्राणिनं प्रीणयितुं शक्नोति।

भगवान् रस इति यच्छान्दोग्योपनिषदाह तदुपरि कथितमेव। श्रीमद्भगवद्गीतायां 'रसोऽहमप्सु' इत्युक्तम्।8 अतः प्राप्य सकलमपि चराचरजगज्जीवनं लभते। तत्र नवायाः शक्तेः सञ्चारो जायते। सर्वा अपि वनस्पतयः, सकला अपि कृषिः, किं बहुना सर्वेऽपि वृक्षाः, सर्वा अपि लतावल्लर्यो जीवनशक्तिमधिगम्य नन्दन्ति। न केवलं चेतनं जगदचेतनजगदपि निखिलं प्रमोदं याति, तस्य विषण्णता दूरीभवति, तस्य मलिनता पलायते, तस्य निराशा नश्यति च। तत् परामेव प्रीतिमवाप्य प्रसीदति। मयूरादिपक्षिणः सानन्दं शब्दं कर्तुमारभन्ते, मण्डूकादिकाश्च जीवाः सुखमधिगम्य स्वस्वविरावं विधातुमारभन्ते। जलमवाप्य वस्तुतः समग्रापि जगती कमप्यद्भुतमेव महान्तमानन्दं लब्ध्वा परां प्रसन्नतामधिगच्छति। अप्सु या एतद्विधा विशिष्टता दृष्टा भवति तस्याः कारणमस्त्यपां परमेश्वररूपस्यान्यतमता। इमा आपो यं महिमानमाप्नुवत, स महिमा न वर्णयितुं शक्योऽतएव आपो 'रस' इति नाम्ना सादरं संस्मियन्ते, कीर्त्यन्ते, च। योऽस्ति रसस्तं प्राप्य सकलमपि जगत् कथं न जीवनशक्तिमासादयेत्, अत एव तु रसेन काव्यमपि भवति सप्राणम्।

रसस्तु स यत्र माधुर्यम् आनन्दश्चानुभूयेते, सर्वेभ्योऽपि विषयेभ्यो मनो निवर्तते। पाठकस्य श्रोतुर्द्रष्टुर्वा मनस्तेन वस्तुना सह पठ्यमानेन दृश्यमाणेन च वस्तुना सह एकीभूतं सत् सम्बध्यते।

## सन्दर्भग्रन्थाः

1-ध्वन्यालोकः :: 1:4
2-साहित्यदर्पणम् :: 1:1
3-काव्यादर्शः :: 2:1
4-काव्यादर्शः :: 2:364-365
5-काव्यादर्शः :: 3:5
6-काव्यालंकारसूत्रवृत्तिः :: 1:2:19
7-श्रीमद्भगवद्गीता :: 7:8

पाश्चात्यदार्शनिकानां ग्रन्थनिर्देशः
न कृतः —

# सन्दर्भ ग्रन्थाः


| ग्रन्थस्य | लेखकः | प्रकाशनम् |
|---|---|---|
| 1. अभिनवभारती | आचार्य विश्वेसर (संपादितम्) | दिल्लीवि.वि.प्रथमसंस्करणम् |
| 2. अग्नि पुराण | एम.ए. दत्ता | कलकत्ता |
| 3. अभिधान कोश | | मेडिकल हाल प्रेसबनारस |
| 4. अद्वैत दीपिका/अद्वैतसिद्धि | | बॉम्बे संस्कृत सिरीज |
| 5. अनालाइटिक सायक्लॉजी | जी.एफ. स्टाउट | लंदन 1909 |
| 6. अरिस्टोटिल | | थिअरीऑफ्पोयट्रीएण्डफाइनआर्ट्स |
| 7. आपस्तम्ब धर्मसूत्रम् | | |
| 8. ईश्वर प्रत्यभिज्ञा विमार्शिनी | उत्पलाचार्य और अभिनवगुप्त | काश्मीर सिरीज |
| 9. इंसटिंक्ट इन मैन बाई जेम्स डेवर कैंब्रिज | | 1921 |
| 10. इण्डियन एस्थेटिक्स | कान्तिचन्द्र पाण्डेय | |
| 11. एन इन्ट्रोडक्शन सोशल सायक्लॉजी बाई विलियम मैक्डूगल | | लंदन 1936 |
| 12. एकावली | विद्याधर | बम्बई संस्कृत सिरीज 1903 |
| 13. ए मैनुअल ऑफ सायक्लॉजी बाई जी.एफ. स्काउट | | लंदन 1919 |
| 14. एन आउटलाइन ऑफ सायक्लॉजी बाई विलियम मैक्डूगल | | |
| 15. ए टेक्सबुक ऑफ सायक्लॉजी बाई एस.वी. सेन | | कलकत्ता |
| 16. ऐतरेय उपनिषद् | | |
| 17. काव्य प्रकाश | आचार्य विश्वेसर | ज्ञान मण्डल |
| 18. काव्य प्रकाश | सत्यव्रत सिंह | चौखम्भा |
| 19. काव्यप्रकाश | | |
| 20. काव्यानुशासन | हेमचन्द्र | श्रीमहावीरजैनविद्यालय बम्बई |
| 21. कामसूत्र | | वात्स्यायन जयमंगलाटीका |
| 22. कठोपनिषद | | निर्णयसागर मुंबई |
| 23. केनोपनिषद् भाष्य | | निर्णयसागर मुंबई |
| 24. गर्भोपनिषद् | | चौखम्भा |
| 25. चन्द्रालोक | जयदेव | बनारस 1937 |
| 26. चिन्तामणि | आचार्य रामचन्द्रशुक्ल | |
| 27. चरकसंहिता | | |
| 28. तंत्रसार | अभिनवगुप्त | काश्मीर सिरीज |
| 29. तर्कभाषा | केशव मिश्र | |
| 30. तर्कसंग्रह | अन्नम भट्ट | |
| 31. थिअरीज ऑफ रस एण्ड ध्वनि | शंकरन | |
| 32. दि सायन्स ऑफ इमोशन्स बाई | डॉ. भगवानदास | 1924 |
| 33. ध्वन्यालोक | आनन्दवर्द्धन | निर्णय सागर प्रेस मुंबई |
| 34. ध्वन्यालोक | डॉ. रामसागर त्रिपाठी | मोतीलाल बनारसीदास |
| 35. दि इशेन्स ऑफ एस्थेटिक | वेने देतो क्रोचे | लंदन 1921 |
| 36. दि एक्स प्रेशन ऑफ द इमोशन्स- | चार्ल्स डार्विन | लंदन |
| 37. इन मैन एण्ड एनीमल्स | | |
| 38. न्याय सूत्रम् | श्री गौतम महामुनि प्रणीतम् | जी.ओ.एस. |
| 39. नाट्यशास्त्र | भरतमुनि | बड़ौदा 1939 |
| 40. नाट्यदर्पण | रामचन्द्र गुणचन्द्र | दिल्ली वि.वि. |
| 41. न्याय कन्दली | | |
| 42. न्याय कुसुमाञ्जलि | उदयन | |

43. न्यायमञ्जरी जयन्त भट्ट
44. परमार्थसार अभिनवगुप्त काश्मीर सिरीज
45. प्रत्यभिज्ञाहृदयम् क्षेमराज काश्मीर सिरीज
46. पातंजल योगदर्शन भगीरथ मिश्रा
47. प्रतापरुद्रीय यशोभूषण विद्यानाथ बम्बई संस्कृत एवं प्राकृत
48. पेन प्लीजर एण्ड एस्थेटिक्स बाई एच.आर.मार्शल
49. प्रिंसिपल्स ऑफ सायक्लॉजी विलियम जेम्स
50. प्रश्नोपनिषद्
51. प्रत्याभिज्ञाहृदयम्
52. भावविलास देव सिरीज 1909
53. भावप्रकाशनम् रसमीमांसा शारदातनय प्रयाग1991
जी.ओ.एस. बड़ौदा 1930
54. श्रीमद्भगवद् गीता
55. भामती मधुसूदन शंकरभाष्य वाचस्पतिमिश्र
56. बृहदारण्यकोपनिषद्
57. भारतीय साहित्यशास्त्र बलदेव उपाध्याय
58. मनोविज्ञान का इतिहास राजनाथ शर्मा एवं सारस्वत
59. माण्डूक्योपनिषद्
60. मीमांसालघुचन्द्रिका ब्रह्मानन्द
61. रसविलास डॉ. भगवानदास डी.ए.ग्रंथ
भूदेव शुक्ल पूना ओरियन्टल बुक हाउस, पूना
62. रसरत्न प्रदीपिका अल्लराज भारतीय विद्याभवन बम्बई 1945
63. रसगंगाधर पंडितराजजगन्नाथ चौखम्भा विद्याभवन
64. रससिद्धान्त स्वरूपविश्लेषण डॉ. आनन्द प्रकाश दीक्षित राजकमल इलाहाबाद
65. रससिद्धान्त की दार्शनिक और नैतिक व्याख्या, डॉ. तारकनाथ बाली
66. रस थ्योरी जी.के. भट्ट विनोद पुस्तक मन्दिर
67. आगरा
68. रहेटरिक बेसिक वर्क्स ऑफ ऑरिस्टोल रिचर्ड मैकओल म.स.युनिवर्सिटी बड़ौदा
69. रस गंगाधर का शास्त्रीय अध्ययन डॉ. प्रेम स्वरूप गुप्त
70. रस सिद्धान्त डॉ. नगेन्द्र दिल्ली वि.विद्यालय
71. व्यक्ति विवेक महिम भट्ट चौखम्भा 1936
72. बृहदारण्यकोपनिषद्
73. वेदान्तसार सदानन्द पूना ओरियन्टलबुक हाउस
74. व्याकरण सिद्धान्त कौमुदी राजस्थान संस्कृत कॉलेज
75. शिवसूत्र विमर्शिनी काश्मीर सिरीज
76. शिवसूत्रा वार्तिकम् भास्कर काश्मीर सिरीज
77. श्रृंगार प्रकाश भाग-1,2 वी. राघवन कर्नाटक पब्लिशिंग हाउस मुंबई
78. स्पन्द कारिका रामकंठाचार्यकृत विकृत्युपतः संस्करण 1996
79. संगीतरत्नाकर आनन्दाश्रम
80. संस्कृतग्रन्थावल
81. सर्वदर्शनसंग्रह माधवाचार्य भण्डारकर ओरियन्टल रिसर्च
इन्स्टीट्यूट पूना 1957
82. साहित्यदर्पण एण्ड दि हिस्ट्री-ऑफ संस्कृत पोयट्रिक्स पी.वी. काणे
83. सरस्वती कंठाभरण भोजदेव कलिकाता 1994
83. साहित्यदर्पण डॉ. सत्यव्रत सिंह चौखम्भा

84. सांख्यकारिका ईश्वरकृष्ण चौखम्भा
85. सायक्लॉजी बाई विलियम जेम्स लंदन 1892
86. दि सायक्लॉजी ऑफ इमोशन्स बाई द रिबोट न्युयॉर्क 1911
87. संस्कृत शब्दार्थ कौस्तुभ द्वारका प्रसाद शर्मा 1957